रनं तैर्मया। ग्रंथग्रंथ्यभिधाः स्फुटं तिमुकुळायस्योदये कौमुदा व्याकुर्वन्नपि पत्रमोहतिमिरं ळोकस्य तन्नाम्यति
श्रीअनंतारकदिकदीप्तिपरम व्योमापि नीरानुसनेगोष्टियस्य सुरवप्रकाशशशिनं तं नौमि विद्यागुरुं। वैदिकमा
र्गविध्वस्ततिरपिसम्यक् सुरक्षितं वक्रे। नयविजितवादिवृंदस्तस्य जयति विबुधेश्वराचार्यः। तद्दोयवेदकाउन्म
त्यमयदिद्दचो भूरिशास्त्रवाविचारः गुणानितपर्णाः समुदितपरमं ब्रह्मबोधप्रसूनः। साक्षाद्दृश्यावचेयं ददृशतफळं
श्रीविवित्स्वेग्राम्याद्दः संसाराक्लेत्यतापप्रश्वमनमनिपुणस्तन्यते कल्पवृक्षः। कीर्त्यापादं वंदनां हुंन्नमपतिश्रीजैत्र
देवात्मजेबुध्योभ्राम्यतिभूत ळंसहमहादेवेनतं खिध्याति। योगी द्वैपरिमुंचति ह्निति भरप्रोद्धृत दीर्घत्वचांअने द्वं
तोपवनस्यमंडनकरं प्रस्तौमिकल्पद्रुमं। श्रीमच्छारीरकमीमांसाभाष्यव्याख्या प्रारिशितं या अविद्यारूप
स्यादिसिद्धये शास्त्रप्रतिपाद्यापरादेवतां प्रणमंछास्त्रीयं विषयादिदर्शयति। अनिर्वाच्येति। एकात्वविद्याञ्
नादिकावरूपादेवताधिकरणे वक्ष्यते। अन्यापूर्वपूर्वविभ्रमसंस्कारस्तदविद्याद्वितयं सत्वासत्वाभ्यामनिर्वा
च्यं सचिवं ठंसै कारिमस्यततथा। तत्सचिवता ब्रह्मणस्तद्विषयता। तदाश्रयस्तु जीवा एवेति वक्ष्यते। अविद्यावि
द्यासाचिव्येब्रह्मणो नीश्वरत्वमुपकरणस्यस्वातंत्र्याविद्यातकत्वादिसाउ। प्रभवत इति न्यथा
भावोविवर्तः। न केवलं भूतानां ब्रह्मविवर्तत्वमपि तु जीवानामपि चराचरशरीरोपाधिकानां तत्प्रतिबिंब

त्वेन तद्विवर्तेनेत्याहुं उपलक्ष्येति। अन्यथा ह्रूत तस्याद्विवद्धौकिक सृष्टेरपि हिरण्यगर्भ द्वारा ब्रह्मैव कर्तृ इत्यनेनोक्तं।
एवमविज्ञातनत्निप्रर्कत्व त्वाभ्यां विषयत्वमुक्त्वा प्रयोजनतामाहा परिमितेति। जगद्विवर्ताधिष्ठानत्वेन ब्रह्मणः स
र्वकर्तृत्वमुक्त्वा सर्वज्ञत्वं ज्ञानपदसूचितं वेदकर्तृत्वादिना साधयति निश्वसितमिति। वीक्षणमात्रेण सृष्टत्वा
द्भूतानि वीक्षितं हिरण्यगर्भद्वारा साध्यं चराचरं वीक्षणाधिकप्रयत्नसाध्यास्मि तत्सांम्यात्स्मितं। सर्वज्ञत्वसिद्ध्यर्थं
चेतेनध मर्सुक्ष्मित्वेन वेतन तांसंभावयति अस्य चेति। यद्वा विनापाशेन नामरूपसृष्टिप्रलयकर्तृत्वादु
॥२॥ ज्ञानेनरक्तो। षाड्गुरितिरीश्वरस्य ऽ गानि पुराणोक्तानि सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्र्यतानित्यमलु ॥२॥
प्तशक्तिः। अविंसं शक्तिस्वविभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्येति। अन्यानि वायुप्रोक्ते पुराणेषु ज्ञानं।
वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः। स्रष्टृत्वमात्मसंबोधोत्यधिष्ठातृत्वमेव च। अव्ययानि दशैतानि नि
मत्संतिष्ठंति शंकर इति। वेदस्य षडंगानि निरुक्तादीनि। अव्ययानि च वादयः। तिळकप्रियः स्वामी तिळक
स्वामी सर्वसिद्धिविधायित्वं स्मृतिसिद्धं। आदित्यस्य सदा पूजां तिळकस्वामिनस्तथा। महागणपतेश्चैव कुर्व
न्सिद्धिमवाप्नुयादिति। वेधसे विधात्रे ईश्वराय महतेः ज्ञानशक्तेरवतारः प्रादिर्पस्मिन्संतथा नन्थावा हृष्टीप

राशरूपः द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने। वेदमेकं सुबहुधा कुरुते जगतो हितमिति। भगवता सूत्रकारेण
साधनचतुष्टयसंपत्त्यनंतरं ब्रह्मजिज्ञासामुपदिश्य नाजिज्ञास्यस्यत्र लक्षणं। संदिग्धत्वसप्रयोजनत्वे स्मृत्वि
षाता तेवाध्यससिध्यधीनसिद्धिकेसवत इति तदाक्षेपसमाधानपरतामाह कोपमित्यतःप्रकः नभाष्यस्पदर्शयति
आक्षेपादिंपरिहरतीत्यंतेन। अन्ये त्वाहुः प्रतिग्रंथं व्याख्यानप्रारंभार्थः। इहाहं प्रसयगम्य मात्मानमुपनिषत्त्वानिपा
द्वजिज्ञास्यत्वेनाक्षेपः तत्पुनर्ब्रह्मले सादौ तु तदतिरिक्तं ब्रह्मेतरतरीकृत्स तस्य वेदांते भ्यः एवसिद्धेर्विचारविषयत्वा
क्षेपतत्त्व ह्रर्बुरतिक्षेदो। जिज्ञास्यत्वव्यापके संदेह प्रयोजनत्वो तद्विरुद्धे वा संदिग्धत्वाप्र योजनत्वेनुक्षेरूप
ळद्धिः तत्त्वव्यापकाभावे व्याप्यजिज्ञास्यत्वाभाव इत्यर्थः। अत्र प्रयोगो मुमुक्षूणां ब्रह्मन विचार्यं तं प्रत्यसंदि
ग्धत्वादहं ताडीनां परिणामपि तृत्वात। नौकाद्वंतवादिनं। आद्यं हेतुं विवृणोति नथाहीत्यादिना देहणत्वादहंदी
तां परिणामक्षम पितृत्वात् नत्वहं प्रत्ययस्य देहादि मिश्रविषयत्वात् कथं विविक्तविषयत्वमतआह वाह
नेति। देहाळंबन इति। आत्मेक्याध्यस्तदेहाळंबन इत्यर्थः। देहादात्मनो हं प्रत्ययगम्यस्य होहयहा
नाध्यास इत्याह तदाळंबनत्वे हीति। बालस्य विरदेहयोः परिमाणभेदान्न प्रत्यभिज्ञास्यकं परिमा णकेदेपि
४ नव्याविधकुंभवत्। तथाअप्रयोजनत्वा ४

देहैकात्मत्वाभिमानं प्रत्याहत्वग्राम इति। आग्रस्याहयोगेति मनुष्यः सन् कृत्रिमव्याघ्रशरीरमभिमन्यमानो यो
न व्याघ्रः। नाहंकारालंबनं देह इति। अत्रापि देहशब्द आत्मैक्याध्यस्तदेहपरः अन्यथाहि जिज्ञासास्यैव वा
दिनापि तन्मात्रालंबनत्वानंगीकारादनुक्तिः। पाठकाः स्यादिति। अन्य वा श्लोकापत्तमतं प्रसंगादुदाशंक्य
निरस्यति प्रत्यक्षानं शब्दः। असत्यस्यारोपितेत्यभेदस्त्यर्थः। वास्तवाभेदस्याध्यासवादिनाप्यनिष्टेः श्लोका
पत्तनिरासे तु यथाश्रुतोर्थः। द्वितीयहेतुं विभजते अप्रयोजनत्वाद्येत्यादिना। ननु किमिति नास्मत्पद्रप्रयो
।।३।। ग्यालस्य लानं प्रत्यात्मभावस्योपनिषद्विरवबोधनादत आहनग्राहमितीति युक्तमिति निर्दिष्टात्सूर्वस्यैव
ह्यंतत्वं व्यावर्तयति अत्रवेति। ननु पुरुषांतरवचनो युष्मत् शब्दः कथमचेतने देहादौ वा प्रयुक्तो ऽत आह ।३।
अहमस्मदिति नान्विदंकारप्रयोगोपि प्रत्यक् परा भावेन भवानिभेदप्रतीतिः एवमपि नि तु सामानाधिकरण्यं गौ
णतत्र भाव्यकारप्रयोगे पीतिनविशेषः कश्चिदत आह र तिव दुष्टप्रयोगदर्शनादिति। यं द्य्युक्तपरत्र गौणत्वमवि
विष्टं तथापि विरळप्रयोगत्वात् स्फुटत्वमहमिति सामानाधिकरण्ये गौणत्वं त तत्रत्र नेदं तिरोधी दृतेत्य
त्वं तभेदसिद्धिरिमे वयमिति तु स दुष्टप्रयोत्वन निरूढमिति तिरोदधीतभेदमतो नात्यंतभेदसिद्धिरित्यते
यळक्षणिकत्वाविशेषेपि प्रयोगबाहुल्याबाहुल्याभ्यां निरूढत्वं प्रतिकतेय यापटः कुकोरथांग नामावक्र
प्रयोगबाहुल्यानिरूढलक्षणाप्रयोगानम्नह [illegible]

वाकरद्विरभ्युजतेवबदुष्ठवेदाश्चकवयश्च अन्यमहमस्मीति। एतेवयमिमे दाराः कन्येवं कुशब्जीवितमित्यादि न
सहानवस्थानं दृष्टं निविवक्षितं दृष्टांतिकेतदभावात्किं त्वन्योन्यानात्मत्वेन स्फुरणमित्यभिप्रेत्याह परस्परे ति
तन्नूलूकादेः प्रकाशे ह्यस्ति तमस्तत्रापि पस्तदाह। नहीतिस्मुहावारंत्वो भेदेनभासमानेहतीवर्तनेयपोरेत
योऽतएवकादेरविवेकादारोप इत्यर्थः इतरेतरभावानुपपत्तिर्नमे तरेतरभावप्रतीत्यनुपपत्ति विवक्षिता तन्मा
त्रतस्तु पपत्तिसाधनेनाध्यासवादिनं प्रति सिद्धसाधनत्वादित्यभिप्रेत्य दृष्टांतेस्थित्वा वक्ति परस्परात्मतया प्रतिमत्रुमिति
इतरेतरस्य तद्रूपभावइति योजने धर्मिणोरपि संसर्गाध्यासनिषेधः स्यात्तथा च सिद्धसाधनं नादा।स्मेप्या
साभ्युपगमात्। तन्निदस्यर्थमाहइतरेतरत्वमिति विनिमयो व्यत्यासः। रूपवत इति गगनस्य तु व्याप्तत्सद्धि
करादिप्रतिबिंबनद्वारान्माश्लिष्टे प्रतिबिंबितत्वविभ्रमः ततश्च रूपवतएवप्रातिबिंबभावइति व्याप्तेर्नव्याप्तिवात्मा
त्मनस्तु नास्ति प्रतिबिंबितत्वभ्रमकरं किंचिदित्यर्थः। धर्माध्यासोऽहि धर्मिणोरैक्यारोपेण प्रतिबिंबभावेन वा दृष्ट इह प्र
तिबिंबकादेरितरत्र आरोपः शिष्यत इत्याह पारिशेष्यादिति अध्यासानुपपत्तिमुपसंहारां धर्मेतो।
स्मत् प्रत्ययेत्यादिभाष्यं अर्थवाहं मनुष्य इत्यादिप्रतीनावतस्मिंस्तत्प्रतीतित्वस्याध्यासलक्षणस्यापवे
उकेळक्षणस्याध्यासस्यानुपपत्त्वस्याभावप्रदर्शनार्थं विषयविषयिणोति विषयोऽचेतनः तस्य द्विपर्ययश्चेतन्यं इत्यं

त्मावेतत्तीमाविद्यात्मन एव कृत्यशेषेहि विजयस्य चेतनत्वमिव भवतीति। तथा चीनि भाष्यसूचितात्मध्यासा
भावाद्धेतोर्विवेकग्रहस्यासिद्धिमाह इदमत्रा कूतमित्यादिना। यथाश्रुत्यादिष्वात्मतत्त्वं गीयते तथा हि मिथ्य
नुभवेद्यदि प्रकाशेन तत्त्वेतदस्तीति योजना। परामर्शोमिथ्येति निर्देशः क्रियासमभिहारः पौनःपुन्यं इतीया
सुंदरी। तत्त्वेतदस्तीति यदुक्तेन तत्र पंचयस्याह मनुभववस्त्विति। उपप्लवो विपर्यासो स्य नास्तीत्यनुपप्लवोह्यनु
भवः कुतोविपर्यासंभूत्यस्यर्थः। कथमात्मतत्त्वगोचर इत्यज्ञानं सूचितं पक्षमादि नानात्मर्य ग्रं हा व
स्तुपजीव्यविरोधाद्प्रमाण्यमाशंक्याह तत्त्वेत्यादिना। ज्येष्ठस्यापि पौर्वापर्यन्याये न बाधमाशंक्याह नु
॥४५॥ दृपेक्षस्येति आगमस्य किं स्वजन्यज्ञानगतप्रमितित्वे प्रत्यक्षोपेक्षा उत तदुत्पत्तौ आद्ये पि किं विपर्या
संज्ञाकानिराकरणाय संवादाय वाद्द्ये निरस्य द्वितीयं शंकते प्रमितावितिआगमस्य किं प्रत्यक्षोपगतवचनं ब्रह्म
प्रि रूप्रामाण्येन विरोधः उत तत्त्वा विदकत्वेन नाद्य इत्याह नहीति द्वितीयं प्रत्याह न चेति। एवमप्रामा
ण्यं निराकृत्योपचरितार्थत्वं नितरस्यतिनत्वाानन्यपरमितिपूर्वभेदाग्रहसिध्यर्थमिदमुक्तं इदानीमुपजीव्य
विरोधाभावायविधौ विधायके वाद्ये परो लक्ष्यः शब्दार्थो न भवतीति शावरस्यामिनोक्तं तत्तु मुख्यं वेदांतेष्वपि अन
धिगतार्थबोधित्वेन तत्परत्वसाम्यादिति। एवं तावदुपजीव्य त्वं प्रत्यक्षस्य निराकृत्ये मुख्यत्वमात्रस्य प्रा

बल्यहेतुतां निराकरोति ज्येष्ठत्वं चेति। पौर्वापर्य इति षष्ठेस्थितं ज्योतिष्टोमे ऽन्योन्यं संबध्य ऋत्विजां व्रजतो निर्गच्छता
मृत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते यद्युद्गाता विच्छिंद्याद् दक्षिणेन यजेत न पजेत यदि प्रतिहर्ता सर्वस्वद
क्षिणेनेति। तत्रोद्गातृप्रतिहर्त्रोः क्रमेण विच्छेदे विरुद्धप्रायश्चित्तयोः समुच्चयासंभवात् किं पूर्वकार्यमुत परमिति
विशये नुपजातविरोधित्वात् पूर्वमिति पूर्वपक्षे राद्धांतः पौर्वापर्ये सति निमित्तयोः पूर्वस्य नैमित्तिकस्य दौर्बल्यं
उत्तरस्य निरपेक्षस्य तद्बाधकतयोदितत्वात् पूर्वादयकाळ उत्तरस्याप्राप्तत्वेन पूर्वेणाबाध्यत्वा योगादुक्तं
हि। पूर्वपरमजाततत्वाद्बाधित्वैवजायते परस्यानन्यथोत्पत्त्या ज्ञानत्वबोधनसंभव इति। प्रकृते विवेत
पश्चात्प्रवृत्तो मुख्योपकाराः कुशाग्रयमनि देशेन विकृतावुपकारकांक्षिण्यां प्राप्ताः कल्प्योपकार
तयावरमभावि रूपिशरैर्निरपेक्षैर्बाध्यंते तद्वदिति। एवं तावच्छ्रुत्यादिगम्यात्मतत्त्वस्याहं प्रत्यये
ऽनवभासादपि विविक्तविषयत्वमुक्तं संप्रतिवादिनिरूपितस्यात्मनोनवभासादपि दोनेहाविवेति ऽ
सर्वगतात्मवादिनेप्रत्याहाहमिहेति। नहितदेवमिति। तवमतेहं प्रत्ययस्य विविक्तात्मविषय
त्वं त्वादित्यर्थः। ननु तत्रात्मवत्तनोहं शब्दो देहउपचर्यते अत आह गौणत्वे चेति भवती
त्यनुषंगः। उपचरितात्मभावस्य देहस्य ज्ञातृत्वानुपपत्ते ज्ञानानरतिप्रतीतिर्नहि भवतीत्यर्थः॥

नच सात्त्वमपि देहउपर्यवसितमिति वाच्यं। वक्तुः स्वज्ञानप्रकाशनपरे वाक्ये तद्विशेषात्। अथाह
माळवने आत्मनि देहगतप्रादेशिकत्वमेवापवर्ण्यते तर्हि देहात्मनोर्भेदो गृहीतव्यः नवगृह्य
तरतिरस्याह। प्रिवे सादिना। अत्र गौणवादीप्रष्टव्यः किं सिंहशब्दस्येव माणवके सांप्रतिकं देहा
दावहंशब्दस्य गौणत्वं उत सार्वपरस्य दो ते ळशब्दस्येव निरूढं नाद्यरत्याह उपरेति। प्रमाण
ळक्षणे स्थितं। तत्रेदं वाक्यं नान्यशास्त्रं अग्निहोत्रं जुहोतीति श्रूयते तत्र संशयः किमग्निहोत्रशब्दो
अग्निदेवतागुणविधिरुत कर्मनामेति तत्राग्नये होत्रं हविरस्मिन्निति समासांतर्वृत्तिन्यायचतुर्थ्या
॥५॥ के होमदेवताप्रतीते गुणविधिरिति प्राप्ते राद्धांतः। यदग्नये च प्रजापतये च सायं जुहोतीति अग्ने
हौत्रदेवतं वप्ररव्यापनात्। प्राप्ते च विधिवैयर्थ्यान्नामधेयं न चात्र चतुर्थीसमाससंभवस्ता ५॥
द्रूपमेतं प्रकृतिविकारयोरभावादिति। एवं नित्याग्निहोत्रवाचिनोग्निहोत्रशब्दस्य गुणादन्यत्र वृ
त्तिं वक्तुमुखाप्यों दृहीत भेदं कर्मोदाहरति। प्रकरणांतरेति। भेदळक्षणे स्थितं। प्रकरणां
तरे प्रयोजनान्यत्वं। कुंडपायिनामयने मासमग्निहोत्रं जुहुतीति श्रूयते अत्र किं नित्याग्नि
होत्रमासे गुणो विधीयत उत कर्मांतरमिति। तत्र सत्यपि प्रदेशभेदे नामानि त्याग्निहोत्रस्य

जुहोः सन्निधानात् तत्समभिव्याहृतस्य जुहोतीत्याख्यातस्य तत्सन्निधापितार्थपरत्वान्नित्या
ग्निहोत्रानुवादेन मासो विधीयत इति प्राप्ते राद्धांतः। न तावदत्राख्यातेन होमानुवादेन मासः शक्यो
विधातुं कालस्य पुरुषानिःपाद्यत्वेनानुपादेयत्वात् नापि मासोद्देशेन नित्याग्निहोत्रविधिः तस्यात्र
सन्निधेर्नव नाम तत्सन्निधापयत्यन्यत्र जुहोतीत्याख्यातेन साध्यतयापूर्वापरीभूतनयोक्तस्याशि
ज्ञार्थबोधे नाम्नानुपस्थापनात् तस्मात्प्रयोजनान्यत्वं विधेयभावनान्यत्वमिति॥ नन्वग्निहोत्र
शब्दस्य कौंडपायिने कर्म्मणि प्रयोगे किं प्रयोजनं न तावन्नित्याग्निहोत्रेण सह क्रियमाणत्वादिसादृश्य
बोधस्तस्य वैयर्थ्यादत आह साध्येति। सप्तमे स्थितं॥ उक्तं क्रियाभिधानं तच्छु[illegible]वन्यत्र विधिप्रदेशः
स्यात्। मासमग्निहोत्रमित्यत्रान्यायचिंता किमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मातिदेशको न वे
ति। तत्र यद्ययं गौणः स्यात्तदा अग्निहोत्रवज्जुहुतीत्यतिदिशेत् तु यथार्थत्वं यं गौणः जुहोतिसामा
नाधिकरण्यस्थात्रापि तुल्यत्वेन नामधेयत्वादग्निदेवताविनोथार्थत्वाद्वा तोनानि दिशेदिति प्राप्ते
सिद्धांतः। न तावदत्राग्निदेवताविधातुं शक्या चतुर्थीसमासासंभवस्योक्तत्वात् नापि हि कर्मभेदे

अनेकार्थत्वस्यान्याय्यत्वादेकत्राग्निहोत्रशब्दो मुख्योऽपरत्र गौणः नित्याग्निहोत्रे च नामप्रवृत्तिनिमित्तस्या
ग्निहोत्रदेवतासंबंधस्याभावात्तत्रैव मुख्यता अतः परशब्दः परत्र सादृश्यमुपादाय प्रवर्तते तच्च
सादृश्यं कर्तव्यार्थबोधकाख्यातसमभिव्याहृतनाम्नाग्निहोत्रवत् जुहोतीति साध्यत्वेन विधे
यामिति तात्पर्यार्थः नित्यधर्मानतिदिशेदिति अतश्च नित्याग्निहोत्रधर्माणां द्रव्यदेवतादीना
मतिदेशो गौणप्रयोगफलमित्यर्थः क्रियायां नित्याग्निहोत्रस्याभिधानं नामधेयमग्निहोत्रपदं मु
कुंतलख्याधिकरणे तस्यान्यत्र श्रवणे विधिप्रदेशः विधेयधर्मातिदेशः स्यादिति सूत्रार्थः। लोके
॥५॥ क्वचिद्धि सादृश्यं गौणीवृत्तिमाह माणवकं इति प्रकृते भेदग्रहाभावमाह नाचेति। निःकृतेष्वकुठिताः प्रतिभा ।।ध्यं।
सिनो गर्गोऽसाधारणाकारास्य स्स तथात्वम्यानानुभूयते। अनुभवे वा वादिविवादो न स्यादित्यर्थः। एव
मप्रतिकूलगौणत्वानि रस्य निरूढानि शास्त्रेन वास्य तेति निरूढत्वं नाम प्रयोगप्राचुर्यान्मुख्यवद्भानं निरू
ढेपि गौणप्रयोगे नार्थयोः तादात्म्यं प्रतीयते प्रतीयते तु प्रकृत इतरविवेक इत्यर्थः। न तस्माद्गौणत्वव्याप
कविवेकविज्ञानमिह व्यावर्तमानं गौणतामपि व्यावर्तयतीत्येतन्नास्ति ह्रमिसन्नियम्यः। अपि ज्ञानोपालंभप्रत्य
याद्विवेकासिद्धावपि प्रत्यक्षि ज्ञानरूपज्ञानसिद्धिमाशंक्याह न यत्र बाष्ठे विरेति। आत्मेकं प्रत्यक्षि ज्ञानार्थः।
गौणत्वाप्त्या सितिकौ निरूढाच।

क्लिनाभ्यामेकस्य भेदस्त्वनुमानात्तच्च शास्त्राद्वृत्तेन ज्ञेयमित्यर्थः। तर्हि परीक्षकाणां देहादावहं शब्दो गौणो नेत्या
ह परीक्षका अपीति अपरोक्षभ्रमो न यौक्तिकबाधाद्युच्छिद्यत इत्यर्थः। देहपरिमाणत्मपक्षे किमवयवारच्च
आत्मनोऽवयवसमुदायः नाद्य इत्याह अनित्यत्वेति। द्वितीये आत्मावयवानां चैतन्यं समुदायस्य वा नाद्य इत्याह
प्रत्येकमिति। द्वितीयेपि समुदायापत्तिः शरीरोपाधिकी वा स्वतन्त्रवा काकतालीया वा आद्यं निरस्य द्वितीयं निरस्यति
नह्यस्त्रद्रूनायेति। न तृतीय इत्याह यदृच्छेति। यादृच्छिकसंश्लेषवत् यादृच्छिकविश्लेषोपि स्यादित्यक्षणामे
वान्यस्मो इवैतन्यापातिरित्यर्थः। पद्गौणत्वादिनाविवेकग्रहमुपपाद्य कुरोऽहमित्यादिप्रत्ययानां गौणत्वमुक्तं दत्त
विवेकसिद्धो निरस्तमित्याह इतनेति। अहंप्रत्ययस्याविवेकविषयत्वे शास्त्रीयविषयसिद्धिमाक्षिप्य प्रयोजन
नसिद्धिमप्याह तदेवमुक्तेनेति। पूतिदुर्गंधिं कूश्माडफलमिव कृतस्त्यो भोक्तुः तात्पर्यमुपवर्ण्य भाष्यं योजयति
तदेवं सर्वप्रवादी सादिना। स्वरूपमन्योन्यात्मकतान्योन्यधर्माध्यासो निमित्तमितरेतराविवेकः फलं व्यवहा
रः अहमिदं शरीरमिति प्रतीत्य भावात्तादात्म्याध्यासमात्रं कान्तुवस्कृत इति अहमिति प्रतीतेपि वास्तवमना मत्वम
३ स्रीति देहे इत्यादिप्रयोग इत्यर्थः। धर्माध्यासाभावादुक्तं धर्माध्यासभावं परिहरति अध्यस्येति। यादृशभाव इति ध
र्मिणोः तादात्म्याध्यासकार्यमहमिदमिति तिमव हारे प्रदर्श्य धर्माध्यासकार्यं दर्शयति ममेदमिति। नन्वध्यस्याव्य
वहार इत्यनुपपन्नं भुक्त्वा व्रजतीति वदेकस्य क्रियाद्वयैककर्तृत्वानभिधानादित आह। त्रचेति। व्यवहारक्रियाया

कंयम

ङ्गित्वस्य कर्तृत्वात्कार्यत्वस्य चास्यादित्यर्थः। ननूपसंहारभाष्ये नैसर्गिकोऽध्यास इत्यभिधानाद्व्यवहारोऽपि नैसर्गि
कत्वविशिष्टोऽध्यास एव तत्कथं क्रियाभेदः। उच्यते इह कार्यभूतव्यवहारनैसर्गिकत्वेन सामर्थ्यासिद्धाध्यासनै
सर्गिकत्वोपसंहारादविरोधः। अध्यासाभिधानाक्षेपयोः पूर्वापरीभावो न युक्तः। विरोधाद्यादिताद्दा तयं विनाक्रि
यान्वयायोगादध्यस्य व्यवहार इत्येनेनाध्यासस्य व्यवहारहेतुतोक्तौ मिथ्याज्ञाननिमित्त इत्यनेन नयो नरूपं
चेति केचित्तन्न पूर्वपूर्वभ्रमसंस्कृताविद्यया वितः संप्रति तनाध्यासक्रियाश्रयत्वात्। पुनरुक्तिं परिहरति पूर्वकाल
॥७॥ त्वेति सुत्योत्तिष्ठतीतिवद्धेतुहेतुमत्त्वं भ्रमं व्यावर्त्यं स्फुटयतीत्यर्थः। जातिव्यक्तोरिवार्थेगतंताद्दात्म्यसंविवे
कानुकृतिभ्रमं व्यावर्तयति विवेकाग्रहेणेति भाष्ये मिथुनीकरणस्य व्यवहारहेतुत्वमानं तर्यात् भान्तिनतु मिथ्या ॥७॥
मूलेऽप्रतियोगित्वं पादने न विवेकाग्रहहेतुत्वे तिरस्कांक्षु इस्यन्योजयति सत्यानृते इति मिथुनीकरणाद्विवेका
ग्रहस्ततोऽध्यास इत्यर्थः। युगळीकरणं नामाधिष्ठानारोप्ययोः स्वरूपेण बुद्धौ भानं ननु मिथुनं कृत्वेति किमिति नो
क्तमत आह नवसंहतीति अभूततद्भावे च्वि[illegible]योगे संपद्यकर्तरि च्विः प्रत्ययो भावेन भूतस्यापत द्भा
वश्चेत्संपद्यते तस्मिन्नभूततद्भाववर्तमानात्प्रातिपदिकात् कृकस्तीनां धातूनां योगे च्विः प्रत्ययो भवति। अस्य

भावितीकारः तत्रश्चमिथुनस्याभावोऽप्यवास्तव इत्यर्थः। समारोपप्रतीत्योरितरेतराश्रयत्वेऽदं किं तेन्य व्यवहारानादित्व
मस्तां प्रतमित्याशंक्याह व्यवहारानादितयेति। अनादित्वादित्यत्रैके पर्यनुयुंजते न मिथ्याज्ञानतत्संस्कार व्यक्तयो
रनादित्वं तत्तज्जात्योरक्तनिमित्तनैमित्तिकभावश्च न च प्रवाहो वस्तु स्तीति तत्र ब्रूमः। तद्दा कृत्स्नुपरकानां व्यक्तीना
मेकयाविना। अनादिकालवृत्तिर्यस्या कार्यानादिताम ता। मिथ्याज्ञानत्वतत्संस्कारत्वजात्याक्लिंगितव्यक्तानांमध्ये
अन्यतमव्यक्त्याविनापदनापद्नादिकालस्यावर्तनमन्यतमपोगानियम इतिया वत्तं तासामनादित्वमत्र च
निमित्तनैमित्तिकयोरनादित्वमुक्तं भ्रमोपादानानादित्वं नुवक्ष्यति देवताधिकरणे। सत्यानृते मिथुनीकृ
त्येत्यत्र वस्तु सत्तावर्जमानो यस्य प्रतीतिमात्रामुपयोगी त्यक्तमिदानीं प्रतीतिरेवानृतस्यात्कर्के त्यान्क्षेपाभि
प्रायमुत्तरभाष्यस्याह अस्यादेनादित्यादिना। युष्मदस्मदित्यादिसूक्तविवेकग्रहाद्दाक्षेप इति भेदः। प्रतीतिरेव
त्वेति। अपरोक्षेत्यर्थः। प्रतीतिमात्रनिर्वाहत्वसत्तादस्याबोधकत्वापतेरनुवादयोगः स्यादिति। ननु नात्यं
तासनदेहादिः दित्वनिर्वाह्यस्तत्तः प्रतीतिः किन्नस्यादत आह प्रकाशमानत्वमिति। अतिरिक्तसत्तामप्युपगच्छ
तं प्रत्याह द्वैतेति द्वैतानुपपत्तेश्चाह सत्ताया श्चेति आत्मन्यध्यास आक्षिप्ते व्यासमान्यलक्षणकथा दृश्येत्या
शंक्याह क्वेकसिद्धमिति दृष्टग्रहणे नाक्षेपप्रातिक्षेपो भाविष्यतीति भावः। अवभासपदस्यावयवार्थमाह

यसंक्षिप्तमध्यासलक्षणमाह अवसन्नरति अवसादः उच्छेदः। अवमानो यौक्तिकतिरस्कार इति। अव
भासपदस्य रूढमर्थमादाय विस्तृतं लक्षणं भाष्यवाक्यार्थत्वेनाह तस्येति परत्रेत्यादिपदैरसत्ख्या
त्यादिनिरासेन रूपं वक्तुमित्यर्थः स्वरूपेण सदपीति अपिशब्देन स्वरूपेणासत्त्वमपि मरीचिकोदकभ्रमे वं
ध्यास इति सूचितं। स्मृतिरूपविशेषणव्यावर्त्यमाह स्यादेतदित्यादिना। पूर्वदृष्टस्य परत्रतादात्म्याव
भास इति धर्म्यध्यासमङ्गीकृत्य लक्षणवाक्यार्थ इति व्याप्तिमाह स्वप्निमस्त्यामिति। परत्रान्यत्र परधर्मा
वभास इति धर्माध्यासं विवक्षित्वाह पाठात्पुनरिति। अवभासपदस्य रूढार्थग्रहणाद्व्याप्त्यनुपप
॥८ न्नेत्याह अवभासपदं चेति। सकृच्छ्रुतपदस्यार्थद्वयं क्रमेण कथं युज्यते। संक्षिप्तविस्तृताध्यासल ।१०
क्षणद्वयलाभतः। एवं च मिथ्याज्ञानमध्यास इत्यवभासपदेन सूत्राद्यप्रत्यभिज्ञायामतिव्याप्त्य
सन्निधानं शोभते तरामित्यपहासो नवसरः। ननु पूर्वदृष्टमारोपणीयमनूतमित्यत्र कथं तत्स
द्वांकि तल्लक्षणस्य प्रत्यभिज्ञायामतिव्याप्तिः। उच्यते स्मृतिरूपपदाक्तिधीस्यमानासन्निधानसिद्ध
त्वकारेण तदक्तिधानं न नुपूर्वदृष्टपदस्यामर्थेनेत्य दोषः। प्रत्यभिज्ञाया आपि संस्कारजत्वेनामाह
त्रिमात्रांशस्य हासान्निहितेति स्मृतिरूपपदेन चासन्निहितविषयत्वं विवक्षितं तो वऽतिचोक्ते स्मृतावति

व्याप्तिरसन्निवृत्तये परत्रेत्युक्तमित्यपि द्रष्टव्यं। अनेनासन्निहितस्य परत्र प्रतीतिरध्यास इति लक्ष
णमुक्तं। असन्निधानं चाशेषस्याधिष्ठाने परमार्थतोऽसत्त्वं न देशान्तरसत्त्वमिति नापराद्धातः।
अथवाऽसन्निधानेन सत्ख्यातिरिह वारिता। अवभासादसत्ख्यातिर्निर्भङ्गे तददर्शनात्। असन्नि
हितस्य परत्र प्रतीयमानस्य पूर्वदृष्टत्वेऽर्थसिद्धेऽपि पुनर्ग्रहणं पूर्वप्रमितत्वव्यावर्तनफलमित्यक
नैवं स्वप्नज्ञाने प्रमाणयोग्यप्रयुक्ताद्यधिष्ठानाभावात् परत्रेति विशेषणाव्याप्तिमाशंक्याह नापीति स्मृतौ
विभ्रमः। स्मर्यमाणे रूपान्तरारोप इति यावत्। अनुभूयमानं पित्राद्यारोपस्य संनिहितत्वं पूर्वदृष्टं तदिहा
रोप्यं अध्यासलक्षणं विशेषणतयोक्तपूर्वदृष्टत्वस्य गृह्यमाणविषयत्वेन प्रसिद्धभ्रमेष्वव्याप्ति
माशंक्याह एवमिति। अत्रापीतिम शंखयोरैक्यको नुभवकाले दृष्टपीतिम्नः पश्चाच्छंखे समारोप इ
ति कत्वे न रूपमारोप्यं किन्तु सामानाधिकरण्यमित्याशंक्य तस्यापि पूर्वदृष्टत्वमाह तथा हीति।
पीतमतपनीययोः संसर्गग्रहेऽप्यसंसर्गो निगृह्यते तथापीति शंखयोरपीति सारूप्यं। आदर्शा
दिष्वारोप्यमुखस्य चक्षुषा पूर्वदृष्टत्वाभावादव्याप्तिमाशंक्याह एवमिति पूर्वदृष्टयोरभिमुखयोरा
दर्शोदकयोर्देशद्वैते देशोपस्य तस्याभावः तत्रा तांतयोरेवाभिमुख्यं वेत्यर्थः।। शीघ्रभ्रमिता ला

तच्चाधिष्ठानसपूर्वदृष्टवक्राकारतायाः आरोपः। अभ्रेषु गजादेः। मंडूकवसाक्ताक्षप्रान्तेष्वंशेषु वसावर्णोऽपि पू
र्वदृष्टोरगतद्गुणसामानाधिकरण्यारोपः इत्यर्थः। तथा सतीति रज्ज्वादीनां सर्पात्मत्वादेः सत्त्वे सतीत्यर्थः। उ
च्छलंतीतुंगानां तरंगभंगानां तरंगाणां वृद्धेद्गानां भाद्रायस्याः सा मंदाकिनी तथा उपभ्यर्णनिकटमरीचीनां तोया
त्मत्वेन सद्विरूके चेन्मरीचीनां तोयरूपेण सत्त्वं तन्मरीचय एवातो नासन्ख्यातिरिति शंकते। पद्युत्येतेति।
निरस्तसमस्तसामर्थ्यस्येत्यर्थक्रियाकारित्वस्यायोग्यः निरस्तत्वस्येति स्वरूपसत्ताभावः तत्तुदयमस्तं
॥५८ तासत्त्वे हेतुः अनिर्वचनीयमतं निरस्यशून्यमतं निरस्यति सद्बौद्धादीनन्यविषयस्येति स्वप्रत्ययः स्वसमाना
कारः पूर्वप्रत्ययः अदृष्टान्तसिद्धो साधारणः। ज्ञानस्यापि पूर्वज्ञानाधीनसत्त्वमतो न कापि स्वरूपसत्त्वमि अथ५
त्यर्थः। नन्वविद्यया असत्प्रकाशनमिति वेदांतः तत्कथं विज्ञानमसत्प्रकाशनमत आह न स्मादिति ना ज्ञानांत
रानुपलब्धेरिति शंक्याश्रयत्वेनाभिमतात् ज्ञानात् ज्ञानांतरानुपलब्धेरित्यर्थः। उपलब्धौ वा तस्यापि ज्ञापक
त्वेन ज्ञानान्तरापेक्षायामनवस्थापाताद्धेत्यर्थः। सति हि कस्मिंश्चित्कस्यचिदुपकारो भवति। प्रत्ययस्य तु नि
रूपणं असत्त्वात्प्राप्यते आ यावन्निवर्त्योपकारिण्यसति प्रत्यक्षप्रकारेण कश्चित्करोतीति नो निमुख्यप्रत्ययरूप
त्वसः। अनाख्याने हेतुमाह असत इति असतः प्रत्ययप्रत्ययनस्य वाविनाभावं संबंधमाशंक्य निराकरोति सदंतरे
णेति। अहो सत इति कार्यकारणभावः स्वभावो वा अविनाभावमूलमित्यर्थः। एवं

सद्दैवख्यातीति पूर्ववादिनो केऽसि ह्यान्यथा तात्रब्रूम इति। पूर्वपक्ष्याह न सत्तत्त्व इति तोयात्मनेत्यनुषंगः। अत्र हेतुमा
ह ह्यतेत्मनेति तद्धात्मना सत्त्वस्य मयापीष्टत्वादित्यर्थः। तद्धि सतत्त्व्यातिः स्वीकृता नेत्याह ह्यिविधं वेति तोय
मपेत्य ज्ञातं मरीचिरूपमेव तोयरूपेणासत् तच्च भावात्मरूपमिति नासत्ख्यातिरित्यर्थः। तोयरूपेणासत्त्वं मरीचि
रूपमेव तच्च बाध्यं तच्चेदभ्रमगोचरः तर्हि न भ्रमबाधप्रसिद्धिः स्यादित्यत आह बाध्यमाहेति। बाढं मरीचीनामतोयात्मत्वं
स्वरूपं तत्तु तथा भ्रमो न गृह्णाति किंतु भावांतर तोयात्मना मरीचीं स्तोयाभाववद्रूपान् गृह्णातीति भ्रमत्वमित्यर्थः। तोया
भावात्मकमरीचिरूपे यद्वारोपितं तोयत्वं न तत्र सदसद्वेति विकल्पाद्यं निरस्यति हन्तेति द्वितीये तु किं तुच्छमसत्सदंतरं
वा नाद्योपराद्धांतात् नाद्वितीयः स्यादेव स्वं तरमेव हीति अस्मिन् हि भ्रमे मरीचयस्तोयं वेति द्वे वस्तुनी भासते। तत्र मरीची
नां तोयतादात्म्यं यदि वस्तु तर्हि तोयाद्वस्तुतो वस्त्वंतरभूता मरीचयो वा स्युर्मरीचिभ्यो वस्त्वंतरं तोयं वा स्यात् नान्यदन्य
स्यास्मिन् भ्रमे अनवभासनादुभयत्र दूषणमाह पूर्वस्मिन्नित्यादिना एवं सत्ख्यातिं निरस्यासत्ख्यातिं निरासमभ्यु
के स्मारयति न चेदमिति। फलितमाह तस्मादिति एवं मरीचितोयतादात्म्यमनिर्वाच्यं प्रसाध्य सदेव भातीति नियममभ्या
ह्यीन्नभावस्वरूपेणानिर्वाच्यमपि तोयं भ्रमे वभासते तु महतीति मुख्यामुख्यदेशांतरादौ सत्त्वकल्पनेत्याह तु दनेनेति॥
नन्वभिनवतोयावभासाभ्युपगमे पूर्वदृष्टत्वं भाष्योक्तं विरुद्ध्येत तत्राह तद्वेति। अभिनवत्वेऽप्यारोपितस्य पूर्वदृष्टग्र
हणमुपपद्यते आरोपणीयसमानमिथ्यावस्त्वंतरोपदर्शकस्य पूर्वदर्शनस्य संस्कारद्वारेणोपयोगादिति। स्वरूपेण मरीचं

कथम

भोमृषावादस्पतेर्मतं। अन्यथाख्यातिरित्यास्ये सन्यथ्यां जगद्दुर्जनाः। एवं तावत् देहादिसत्त्वे भासमानत्वादात्म
वदित्यनुमानस्य मरीचिकोदकादावनैकान्त्योपपादनेन देहादेरनिर्वाच्यत्वमुक्तं सं प्रत्यबाधितत्वेन सोपाधिक
तामाह देहेन्द्रियादीति। अबाध्यत्वमात्मनः सत्त्वमुपाधिर्न प्रतिभासमानत्वं। न च साध्यव्याप्तिर्देहादिबाधस्यतत्र
तत्र वक्ष्यमाणत्वादित्यर्थः। विपक्षस्य मरीचितोयादेः सत्त्वान्न पक्षेतरता। ननु प्रत्यक्षादिप्रमाणार्पितं देहादि यदि
मिथ्यात्वं तर्हि निकोवि स्त्वत्राह विद्वात्मात्विति। न त्वा वदेक प्रमाणप्रमितत्वादात्मनः सत्त्वं न व्यावहारिकप्र
माणसिद्धदेहादेरिति वक्ष्याम इति भावः। यत्तु कमा सैप वादिना प्रकाशमानत्वमेव विद्वात्मनोपि सत्त्वमिति तदपि
विशेषाभ्युपगमेन परिहरत्यबाधितेति। स्वयंप्रकाशत्वादबाधितत्वमेमात्मनः सत्त्वं न देहस्य देहादे रुपसंहा
॥१०॥ धानिरूपणादित्यर्थः। न च सत्तातद्वद्वैत हानिरित्याह सा चेति। यत्तु सत्तासमवायादेः सत्तालक्षणत्वमखंडितं ॥१०॥
दनुमोदते नाविति। यत्तु कश्चित् प्रख्याप संसारस्यानृतत्ववर्णनं न तावत् ब्रह्मज्ञानानिबर्हणीयत्वाय शास्त्र
प्रामाण्यात् सत्यस्यापि ज्ञानात् निवृत्तेर्न च संसारिणोऽसंसारिब्रह्मैकत्वार्थं सोपाधिकस्य संसारस्य सत्यस्याप्युपा
धिनिवृत्त्या निवृत्तौ जीवस्य ब्रह्मैक्यसंभवादिति॥ तन्न सत्यस्यात्मवद् निवृत्तेः सत्र सामान्यतोदृष्टमनुमानमप्रमाणं।
ज्योतिष्टोमेन स्वर्गफलः क्रियात्वात्मर्दनवदिति तत्र नत्र स्वर्गोद्देशेन यागविधिना विरोधेन कालात्ययापदिष्टत्वात्। अत्र तु
सत्यः प्रपंचो ज्ञाननिवर्त्यः साधनाभावेन तदभावात् प्रत्यक्षमिथ्यात्वस्य बंधस्य ज्ञाननिवर्त्यत्वश्रुत्यर्थापत्तिसि

द्धेः। यद्यपि ताम्रधानादिना सर्पविषादि नश्यतीति। तदपि न विवादेः सत्यत्वासिद्धेः ध्यानस्य वाप्रमात्वेनादृष्टान्त
त्वात्। सेतुदर्शनं च चोदितक्रियात्वेनैनोनिबर्हकं। न प्रमितिस्तात्मना पश्यतामपि सेतुं म्लेच्छानां श्रद्धाविरहिणा
वाद्यनुपलब्धा तस्य प्रमातुरदृष्टद्वारेण बंधनिवर्त्तिनी न विधिद्वारा तत्र द्वितीयः समन्वयसूत्रे परा करिष्यमाणत्वा
त्। यं त्वसोपाधिध्वंसात् संसारध्वंस इति। तन्न सत्सोपाधेरारंभणाद्यधिकरणे वक्ष्यमाणन्यायेनासंभवात् मिथ्योपाधि
स्वीकारे चाऽविवादादिति। न त्वाध्यासलक्षणे मतांतरोपन्यासो मातिसंवादाय दूषणाय वा नाद्यो विप्रतिपत्तेर्न
द्वितीयो दूषणानभिधानादित्यत आह सवाय मिति। परत्र परावभासइत्यर्कलक्षणे मतिसंवाद इदं वक्ष्यते। एवं लक्ष
णस्याध्यासस्यानिर्वाच्यत्वमेवेति मरीचिकोदकनिरूपणेदर्शितं। विप्रतिपत्तिस्त्वाधिष्ठानारोप्यविशेषविषयेत्यर्थः।
अन्यत्रान्यधर्माध्यास इति धर्मग्रहणे न बुध्याकारत्वसूचनात् मरव्यास्तु वा दार्थ तत्र बौद्धानां मतभेदे
नभ्युपात्विज्ञानविशेषमाह सौत्रांतिक नयइति। यद्यपि सौत्रांतिकस्य वैभाषिकवद्बाह्योर्थः प्रत्यक्षस्तथापि ज्ञानगत
र्थस्यानुरूप्येणानुमीयमानत्वात्क्षितावदधिष्ठानं। आरोप्यं तु ज्ञानाकारमेव भ्रांतिज्ञानाकारसदृशस्य बाह्यार्थस्या
भावादित्यर्थः। सहोपलंभनियमादिसाध्यनुमानमुपरिष्टाद्द्रौहाधिकरणे निराकरिष्यत इत्यर्थः। प्रतिपन्नं प्रत्ययो
दितिसमानाधिकरण्ये पंचम्यौ ज्ञानात्मका प्रतिपत्तुरित्यर्थः। कस्तत्त्वस्य छेदेरवयोग्यपरजतस्यध्यमादिदंतया प्रतीतिरि

५४

श्रम

तिशंकतेभ्रांतिमिति। भ्रांतिरूपविकल्पस्यापिस्वरूपविकल्पकं ग्राह्यं तदेव वाच्यत्वेन सविकल्पकत्वेनाध्यवसे
यमित्यर्थः सिद्धे ज्ञानाकारत्व एवं कल्प्येत न तदेव कुतस्तत्राह ज्ञानाकारेति ति। प्रागुक्तन्यायानुप्रवेदनीयेत्यर्थः।
बाधकप्रत्ययः किं साक्षात् ज्ञानाकारतां दर्शयित्वा भावद्वैति विकल्प्याद्यमनुभवविरोधेन निरस्याद्वितीयं शंकते
पुरोवर्तित्वेतिरदंता प्रतिषेधो निर्दृष्टांगमपेत्सा वदेशांतरादिसत्वेपि स्यादित्यन्यथोपपत्तिमाह सान्निध्यानेति
अख्यातिमते हि रजतस्यासान्निध्याग्रहः सन्निहितत्वेन व्यवहारहेतुस्तावद्रूमस्तान्निषेधांसन्निधानग्रहरू
॥११॥ पो बाधः प्रागभावनिवृत्तिरूपत्वात् भावस्य तस्माद्वारोप्योर्थः प्रतिपन्नुरसंनिहितोभवतीत्यर्थः। यदुक्तं क
ल्पनागौरवमितितत्राह न चैष इतिसद्वसम्मतस्य व्यवहारमात्रबाधस्य स्वीकारात्कस्यविदर्थस्यबाधा
दृतिष्वबवमित्यर्थः नतु न व्यवहारप्रवनिषेध्यः किंतु शुक्तौ प्रतीतं रजतमित्यत्रैवं न्यथाख्यातिमाशंक्याह
न चरजतमेवेत्यादिना। ननु भाभातुरजतज्ञानेशुक्तिः पुरोदेशसत्तामात्रेण ज्ञालंबनं किं न स्यादत आह न स्व
च्छिति। सर्वेषां पुरोवर्तिनां ज्ञानालंबनत्वाद्विनामित्यर्थः। अभ्रवरजतसदृशशुक्तौ रजतज्ञानहेतुसंस्कारो बाधकत्वेना
ऽव्यवस्थितत्वं तत्राह व्यापीतिएवमर्थमारोपितप्रतिषिध्य मिथ्याज्ञानमपि निह्नुतेपि चेति। ननु मिथ्याव्यवहारसि
द्ध्यर्थं विपर्ययो वा व्यक्तत्राह तथा वेत्यादिना। शुक्तित्वरूपस्येदमात्माक सामान्यप्रतीति विशेषस्याग्रहा दिदमि

तिइदमात्रग्रहणं भवतीत्यर्थः। गृहीतग्रहणस्वभावेति। गृहीतमिदमितिप्रकाशनस्वभावेत्यर्थः सन्निहितर
जतेति सन्निहितरजतगोचरं हि ज्ञानं इदमिति रजतमित्याकारयोरसंसर्गनगृह्णातितयोः संसृष्टत्वेनासंस
र्गाभावात् न च स्वगतं विवेकमेकज्ञानत्वादेव मेतेऽपि ग्रहणस्मरणोपरस्परं भिन्नेऽपि स्वगतभेदं न गृ
ह्णीतः नाप्यसंसृष्टौ स्वगोचरौ तत्त्वैव निवेदयत इति सारूप्यं कावाहरितद्व्यविशेषः निषेधधर्माभावे निषेधानु
पपत्तिमाशंक्याह भेदाग्रहेति। इतरेतराभाववोधादितरेतराभावाग्रहनिहत्तौ तन्तु क व्यवहारनिवृत्तिर्वाधफ
लमित्यर्थः। तस्माद्यमात्यइति सर्वे विप्रतिपन्नाइत्येकोधर्मिनिर्देशः संदेहविभ्रमारत्यपरः। अयथार्थव्यव
हारहेतुत्वेन मतद्वयसंमताः प्रत्यया धर्मिण इति नाश्रयासिद्धिः। आस्तेतावदिति पुरोवर्तिनि रजतमितिसा
मानाधिकरण्यव्यपदेशस्तथाविधप्रवृत्तिश्चास्तीति तावत्सर्वजनीनं। तत्सामानाधिकरण्यप्रत्ययादजतमि
दमित्येवंरूपाद्भवति नान्यथेत्यर्थः। अन्यथासिद्धिमाशंक्याह तदितदिवेति। अगृहीतविवेकस्मरणद्वयमयथा
व्यवहारहेतुरेवं केवलाद्यो ज्ञानयोस्यौगपद्यान्वद्वितीयरस्याह न हि रजतप्रातिपदिकार्थेति। ग्रहणेपितु व्य
मिदं। यदि तद्विशेतस्ये व प्रवर्तेनेत्यर्थः। ज्ञातसंबंधस्य पुंसो लिंगविशिष्टधर्मैकदेशदर्शनात् लिंगिविशिष्टधर्मै
कदेशे बुद्धिरनुमानमिति शावरेत्वाभिनआहुः। समारोपे तु प्रमित्यभावेप्येकदेशदर्शनमस्तीत्यर्थः। पुरोवर्तिनिसा

कख

धने प्रवर्तकफलज्ञाने नैकान्तिकतानिरुक्त्यर्थमाह नियमेनेति फलस्य हि नानोपायसाध्यत्वान्न तत्र ज्ञानमुपायेनिय
मेन प्रवर्तकं स्मरणे व्यभिचारनिरुक्त्यर्थमाह तत्रेति। बाध्यादौ व्यभिचारमाशंक्याह रजतादीति अर्थे न रति बाध्यादिर्दि
प्रसक्त्यप्रवर्तयन्नि नत्वार्थितामनुनुधेय यद्योक्तसमीचीनज्ञानहेतुभ्यो नामिथ्याज्ञानजन्मेति तत्राह दृष्टं चेति। पारि
त्ये त्वत्तन्यायकाणिकापामिति एवं हि तत्र व्युत्पादितं किमव्यभिचारितैव प्रामाण्यमुत तद्धेतुर यत ह्यापिकाये
॥१४॥ न क्वचिद्व्यभिचारदर्शनात् ज्ञानानामप्रामाण्यमापते तु सर्वथा असंभवः व्यभिचारिणामपि सितनील्या
दिषु चक्षुरादीनां बोधकत्वेन प्रामाण्याद् व्यभिचारिणामपि दहनादौ धूमादीनां कुतश्चिन्निमित्तात् दुपजनित
दहनादि ज्ञानानाम प्रामाण्यात्। एवं ज्ञानकरणं व्यभिचारेपि बोधकं ज्ञानं न त्वव्यभिचारापेक्षं स्वका
र्य इति चेत्। किं ज्ञेयावभासे पेक्षा उत प्रवृत्त्यादिकार्येन प्रथमः जन्मनैव ज्ञानस्य ज्ञेयावभासात्मकत्वान्न च
रमे व्यभिचारग्राहिणोर्थक्रियापासंवादि ज्ञानस्य ज्ञानान्तराद्व्यभिचारनिश्चयेन वस्त्वापातानिश्चयेवानव
स्थितप्रामाण्यादस्मात्प्रथमज्ञानप्रामाण्यासिद्धेः स्वतः प्रामाण्येच प्रथमेपि तथात्वापातादिति। ननु किं प्रामाण्य
स्य स्वतस्त्वं ज्ञानसामग्रीमात्रजन्यत्वं उत प्रामाण्यस्य जातित्वे स्मृतिज्ञानेधिकरण ज्ञानगतबाधात्वं ताभ्यां कृतो
पाधित्वे वा द्वयोरपि नित्यत्वेन जन्माभावादिति तदुच्यते इयं तू प्रमा अर्थसंप्रयोगत्वा नैधिकरणैराचक्षुरगतगुण

जन्या न भवति प्रमात्वाच्छ्रोत्रजप्रमावत् तथा एषा प्रमा उक्तविधगुणज्ञानाधीन ज्ञाना न भवति तथाविधगुणज्ञानाधीन
प्रवृत्ती करीव न भवति ततस्तत्तद्दृष्टेवेति ज्ञप्ति व्यवहारयोरपि स्वतस्त्वसिद्धिरिति। कार्ये न्यथाख्यातिः स्वीकृतेतिभ्र
मं वेत्याह वर्तमत्वावस्थेन्यस्यान्यधर्मकल्पनेति। अवभासपरं व्याख्यानं कल्पनेति सर्वं तत्राविरुद्धोर्थः सर्वं तत्र प्रसि
द्धान्ते सुखाप्रमाणात्प्रमेयमितिरजतवादितिनसादृश्यवन्नापि तु भासते परं ज्ञेरैतवत् नाहिवस्तुतो रजतमिति मि
थ्यात्वे विवक्षितमिस्याह नपुनरिति। एवमारोप्यसिद्धसंप्रवप्रसक्त आक्षेपेपरिहृते पुनः साम्नो नोथिज्ञानत्वानुपपत्ता
ध्यासमाक्षिप्य तद्व्याहपुनरपीति। आत्मनो ग्राह्यत्वे स्वग्राह्यत्वं परग्राह्यत्वं वा नाद्य इत्याह नस्वध्वेति॥
न द्वितीय इत्याह तामंतरेति। संविदाश्रयत्वेन सिद्धिमाशंकते स्यादेतदिति। स्वप्रकाशफलस्य जन्मादिनिषेधेना त्वत्
मुपपादयति मध्याह्निकादिना। न त्वभ्युपेयते संविदपराधीनप्रकाशेति आत्मातु जडः किन्न स्यादिति मत्वा न संविदा
श्रयत्ववादिनां प्रसात्मस्वप्रकाशत्ववाध्यात्मापीति। अर्थात्मसंबधिन्यां संविद्यजडायामपि नार्थात्मनोः प्रका
शमानतासिद्धिः पोडितेपि पुत्रे पितुरपाडितत्ववादित्यक्तेवैषम्यशंकते स्वभाव एवेति। आश्रयविषयपारतंत्र्यनियमा
त्स्वभावसंवं ह्यासं विन्नपुत्रः पितृभावेपि भावादित्यर्थः। पुत्रगतजन्यत्वमपि नित्यपितृगतजनकत्वसापेक्षमितिसा
म्यमाह हन्तेति। अर्थात्मनोः प्रकाशेनसह संवित्प्रकाशाइत्युक्तेयः संविदः प्रकाशोयश्चार्थात्मनोः प्रकाशः स्तौ संविदः
प्रकाशाद्भिन्नावभिन्नौ वा नाद्य इत्याह तत्किमिति। संविदः प्रकाशव्यतिरेके संविदप्रकाशानुपासतीघटवदस्वप्रका

कव्य

धने प्रवर्त्तकफलज्ञाने नैकान्तिकतानिवृत्त्यर्थमाह नियमेनेति फलस्य हि नानोपायसाध्यत्वान्न तत्ज्ञानमुपायेनिय
मेन प्रवर्त्तकं स्मरणे व्यभिचारनिवृत्त्यर्थमाह तत्रेति। बाध्यादौ व्यभिचारमाशंक्याह रजतादीति अर्थेनरति बाध्यादिदि
क्षस्य प्रवर्त्तयति न त्वार्थितामनुनुधेय यद्वा क्व समीचीनज्ञानहेतुभ्यो नामिथ्याज्ञानजन्मेति तत्राह दृष्टं चेति। परि
दृष्ट्वा दृष्टं तन्न्यापकाणि कायामिति एवं हि तत्र व्युत्पादितं किम् व्यभिचारितैव प्रामाण्यमुत तद्धेतुरथ तद्व्यापि कार्ये
॥१२॥ ना। क्वचिद्व्यभिचारदर्शनात् ज्ञानानाम प्रामाण्यमापतेत् सर्वथा असंभवः व्यभिचारिणामपि। सितनील्या
दिषु चक्षुरादीनां बोधकत्वेन प्रामाण्याद्व्यभिचारिणामपि दृष्टं नादौ धूमादीनां कुतश्चिन्निमित्ताद्दुपजनित
दृष्टं नादि ज्ञानानाम प्रामाण्यात्। यत्र तु ज्ञानकरणं व्यभिचारेपि बोधकं ज्ञानेन त्वव्यभिचारोपेक्ष्यः स्वका
र्यहानिवेत्। किं ज्ञेयावभासे पेक्षा उत प्रवृत्त्यादिकार्ये न प्रथमः जन्मनैव ज्ञानस्य ज्ञेयावभासात्मकत्वान्न च सिध्य
रमे व्यभिचारग्राहिणोर्थक्रियासंवादिज्ञानस्य ज्ञानान्तराद्व्यभिचारनिश्चयेन वस्थापातादनिश्चयेवानव
स्थित प्रामाण्यादस्मात् प्रथमज्ञानप्रामाण्यासिद्धेः स्वतः प्रमाणैव प्रथमेपि तथात्वापातादिति। ननु किं प्रामाण्य
स्य स्वतस्त्वं ज्ञानसामग्रीमात्रजन्यत्वं वा प्रामाण्यस्य जातित्वे स्मृतिज्ञानेधिकरणज्ञानगतबाधात्वं ताभ्यां रूपो
पाधित्वे वा द्वयोरपि नित्यत्वेन जन्माभावादिति तदुत्तरे यत्तु प्रमा अर्थसंप्रयोगत्वान्नाधिकरणैतावद्गतगुण

जन्यानभवति प्रमात्वाच्छ्रोत्रजप्रमावत्। तथा एषा प्रमा उक्तविधगुणज्ञानाधीन ज्ञानानभवति तथाविधगुणज्ञानाधीन
प्रवृत्ति करीव न भवति न तदेव तद्द्वेवेति ज्ञप्तिव्यवहारयोरपि स्वतस्त्वसिद्धिरिति। प्राभाकरैर्न्यथाख्यातिः स्वीकृतेतिभ्र
मं देशावर्त्तयन् व्याचष्टे न्यस्यान्यधर्मकत्वमनेति। अवभासपरव्याख्यानं कत्वमनेतिसर्वत्र ताविरुद्धोर्थः सर्वं तत्रप्रसि
द्धान्ते प्रत्याप्रमाणात्प्रमेयमिति रजतवादितिन साद्रूपवस्त्वापि तुभासतेपरं जेरतवत् नाहि वस्तुतोरजतमिति भि
न्यत्वं विवक्षितमित्याह न पुनरिति। एवमारोप्यसिद्धौ संजव प्रयुक्त आक्षेपे परिहृते पुनरात्मनोर्थज्ञानत्वानुपपत्त्या
ध्यास आक्षिप्य तद्द्वयाह पुनरपीति। आत्मनो ग्राह्यत्वे स्वग्राह्यत्वं परग्राह्यत्वं वा नाद्य इत्याह। न स्वविति।।
नद्वितीय इत्याह तामन्तरेति। संविदाश्रयत्वेन सिद्धिमाशंकते स्यादेतदिति। स्वप्रकाशफलस्य जन्यादिनिषेधेनात्मत्व
मुपपादयति यथाहि त्यादिना। न त्वभ्युपेयते संविद्परशाधीनप्रकाशेति आत्मा तु जडः किन्न स्यादिति मत्वा न संविदा
श्रयत्ववादिनां प्रसात्मस्वप्रकाशत्वबाध्याहतथापीति। अर्थात्मसंबन्धिन्यां संविद्यजडायामपि नात्मनः प्रका
शमानतासिद्धिः पितृते पिपुत्रे पितुरुत्पादि त्ववादि स्फकेवैधम्यमाशंकते स्वभाव एवेति। आश्रयविषयपारतंत्र्यनियमा
त्स्वभावसंवद्धासंवित्परपुत्रः पित्राभावे पि भावादित्यर्थः। पुत्रगतजन्यत्वमपि नित्यं पितृगतजनकत्वसापेक्षमिति सा
म्यमाह तेतीति। अर्थात्मनोः प्रकाशेन सहसंवित्प्रकाशादस्फकेयः संविदः प्रकाशोयश्चार्थात्मनोः प्रकाशः सैव संविदः
स्व कारात् भिन्नावभिन्नौ वा नाद्य इत्याह तत्किमिति। संविदः प्रकाशव्यतिरेके संविद्प्रकाशानुभासतीघटवदस्वप्रका

शास्यात् आत्मार्थप्रकाशयोः संभावितव्यतिरेकसंविदर्थात्मप्रकाशरूपा न भवेत् किंतु तापि कास्यात्तथा चान
वस्थेत्याशयः अन्योन्याशंकनेत्येतिसंविदश्चार्थात्मनो श्व प्रकाशाविसर्यः। कथं भूतौ ताविसये आपां सरवात्सं
विदेवेति। दूषयति इष्टवामिति। संविदतिरिक्तप्रकाशानंगीकारे संविदर्थात्मनां साहित्यमुक्तं स्यात् तथा च पुत्रपां उित
तुष्यते त्यर्थः। अर्थसंविदोः सहभावमंगीकृत्यानुपयोगमुक्तः स एव तु क्वचिद्वासिद्ध इत्याहन वेति अनी। ताद्दिबुद्धि
स्तत्साहित्यात तद्विषयत्वा तादिबुद्धिजनकत्वाद्वर्त्तमानबुद्धिवदिति शंकते। तद्विषयेति। तद्विषयाश्च ताहानादिबुद्धय
श्च इति विग्रहः। तद्विषयहानादिबुद्धिजनकत्वादिति हेतौ तद्विषयत्वविशेषणस्यासिद्धिमाहनेति। ताकारि हरादि
॥१४॥ हानादिजननादिति। सिद्धे हेतावतीतादिसंविदामर्थसहभावसिद्धेस्तद्विषयत्वसिद्धिरित्याहार्थविषयेति। अर्थवि ॥१३॥
षयहानादिप्रवृत्तिजननात् हानादिबुद्धिरर्थविषयप्रकाशनेतिप्रसंगं दर्शयन्विशेषणासिद्धिं दूषयति तत्किमिति।
अर्थं शेषं इति सप्तमी। प्रयत्नवशात् मदेहसंयोगोर्थविषयप्रवृत्तिहेतुरपि जडत्वान्नार्थविषयप्रकाशस्वेत्ती
विकाशोपि स्वप्रकाशत्वात् स्वमात्रे साक्षी अर्थे स्वप्रकाशनात् जडस्यार्थस्यापि स्वप्रकाशरूपां तत्त्वेनसिद्धिश्च
दर्शं संविदेक्षेन स्यादित्यन्तिप्रेत्याह नन्वयमिति। मा भूदेहदिति वदंतं बौद्धं गांधिनमेकदेशेन निराकरोत्साक्षे
स्वानवप्रकाशस्येति सिद्धांतस्पृत्तिमतां संविद्विवर्त्ततया तदेकदेशेनार्थसिद्धिमद्ध्यासारं शुद्धं वक्ष्यामीति मत्वानानुव
दंती। तस्मादिति। एवं संविदेः स्वप्रकाशतां विषयस्य च तदभ्यस्ततां मुक्त्वा तस्या आत्मत्वसिद्ध्यर्थमद्वितीयतामा

हनवासेति आ ज्ञानतो रूपावतः इति तत्कित आत्मस्वप्रकाशत्वे प्रयुज्यते देव दत्त सुषुप्तिकाले देवदत्ता
त्मसाक्षीति स्वव्यवहारहेतुः स्वसाक्षात्कारवान् कालत्वादितरकालवदिति न च सुषुप्तावहं ध्वनिरस्ति न च पुरुषान्तरत
त्साक्षात्कर्तुमर्हति। ईश्वरमते योगिमते वा नीश्वरे त्वयोगिजे नित्यविशेषणीयामित्तिस्वप्रकाशत्वसिद्धिरिति। तदेवं
पक्षांतरनिरासेन स्वप्रकाश आत्मेति स्थापितमस्मिन्पक्षे ध्यासाक्षेपकतया भाष्यं योजयति तदयमिति प्रत्यक्
शब्दार्थमाहअशक्येति प्रतीपं प्रतिलोम्येन तद्वेदर्शयति निर्वचनीयमिति। कथमिति चमुप्रत्ययांतस्य किंश
ब्दस्यरूपं तत्र किंशब्द आक्षेपार्थ इत्यर्थः। अप्रथमानत्वपक्षे दूषणं सर्वोहीति भाष्यो क्रमात्सशातनेपीति
भाष्यकारेणात्मनोस्मत्प्रत्ययाविषयत्वोपवर्णनेनाविषयत्वस्यासिद्धिरुक्ता सानुपुकास्वप्रकाशस्यदर्वियं
त्वामोगादित्साशंक्यौपाधिकरूपेण विषयतामा हस इत्यादिनाबुद्धि मनः प्राणेंद्रियाणि परच्छोकगतो आ
श्रयभूतानि भूतसूक्ष्माणि सूक्ष्मं शरीरं बुद्धिमनसी इ वसूक्ष्मशरीर मिति वा। इंद्रियाणि बाह्यानि ननु स्वतो
विषयत्वमौपाधिकरूपेण विषयत्वमिति किमिति अवस्थाप्यतेस्वत एव मुक्तिवनूग्रहणाग्रहे ये किं न स्यात्
तामित्याशंक्यानिरंशत्वान्नेत्याह न हि विदेकरसस्येति। ननु विद्रूपेभात्स्यपानंदादि न भातीति हस्तं नेत्याह।
न स्वव्येति। तर्हि साक्षिप्रतिभासे आनंदाद्यप्रकाशेरवापि स्यादित्याशंक्याह गृहीतार एवेति। यथा स्वस्वाक्षि लाभो

भासमानमपि देवदत्तैक्यं तत्र दंतोपाधिद्वारकसामानाधिकरण्यापरामर्शाद् विविक्तं नोल्लिख्यते एवं विद्रूप
भानेपि दुःप्रसन्नीकत्वादिरूपेणापरामृष्टा आनंदादयोप्यगृहीता इवसंतीत्यर्थः। ननु विषयनितभासेत
दात्मत्वाद्यानंदाद्यपोभातिचेत्तर्हि वुध्यादिष्वध्यैतन्यस्यक्तेपि प्रतीयेत तत्र विद्यमानत्वात्तत्रास्त्वनुद्यादि
ष्वध्यासायोग इत्याशंक्याहनत्वा ममेन इति आनंदादीनां वास्तवत्वाद्वैतन्यैकरसतानभेदस्यैव भानमित्य
॥१४ र्थः। यदुक्तं विषयत्वेपुष्पत्वस्य विषयत्वापत्तिः तत्रश्चानात्मत्वमिति तत्राह तस्यचेति। इदमात्मकत्वेन विष
यत्वमनिदमात्मकत्वेनात्मत्वं दुष्टं एवश्चोपपद्यत इत्यर्थः। इदमनिदमात्मकत्वं जीवस्य तद्द्वंमोन्वयप्रदर्शने
नोपपादयति। तथाहीति विल्हुरणात् साक्षिस्फुरणात्। ननूपाधिपरिच्छेदमंतरेणात्म एवपरमात्मनो जीवो हं
त्र प्रत्ययविषयोस्तु तत्राह न एवच्छिन्नेति। अस्मदर्थस्य विषयत्वमपि जीवस्याहंप्रत्ययविशिष्टेत्वंतःकरणावि
वच्छेदयोग्यत्वापत्तिः न कर्मत्वमतो न कर्मकर्तृत्वविरोधेरत्यपसंहारव्याजेनाहतं स्मादितिस्वप्रकाशेपावत
सत्वं प्रकाशानाद्दतारोपरतिपक्षः पूर्वपूर्वाध्यासवशात् प्रकाशसमर्थनेन निरस्त इदानीं प्रथमानेना
ध्यारोपयै इति पक्षमुपन्यस्य निरस्यति स्यादेतदित्यादिना। अपरोक्षत्वाध्यासश्चाध्यमानतापरोक्षप्रमा
विषयानं त्वेव्यपरोक्षेणस्य भावितत्वं सत्वेनापरोक्षः तस्मिन्नध्यासोपयोगि प्रथनाभावान्नध्यास इत्यर्थः।

रूपरहितनदसत्वात्स्पर्शरहितत्वादिति दोहेतू वक्ति नभो हीतिवायुः स्पर्शानप्रत्यक्षवदिति पक्षे द्विती
यएव हेतुः। दुःखाकवाशेतिवस्कृत्तेनादुःखिनं दुःखिनं करोतीत्यर्थः। अस्तु स्वरूपं चतन्यं द्वैवधारणं चेति
कर्मधारयमभिप्रेत्याक्षिपति स्वरूपज्ञानमाह चिदात्मरूपमिति निरूपद्रवरूपतामिति। क्षणभङ्गनाशकत्वात् वि
ज्ञानं सर्वविषयज्ञानमुत्पद्यते ते नविषयीकृतस्य निरूपद्रवपरमार्थस्वभावस्य संस्कारवच्छादनुवर्तमा
नविषयेर्भेदर्वाधः कुतः बुद्धेः परमार्थभावनाजन्यायाः वस्तुपक्षपातित्वेन प्राबल्यात्। ननु लब्धा नाभ्यासव
शेनात्मादिभावनापि सातिशयमेव कार्यं जनयति कथं सर्वविषयज्ञानलाभ इति शंकामपाकर्तुमनंतवत्ते
पीत्युक्तं लब्धनाभ्यासे हि योगेषु मात्रदेशलब्धेनेप्रयत्नस्तातोधिकोद्विगुणदेशलब्धयनेपेक्ष्यते नैरात्म्यादित
त्वविषयप्रत्ययाभ्यासेनुयाहशः प्रथमप्रत्ययोत्पादे प्रयत्नः तादृशएव द्वितीयादावपि वैशद्याधिक्यं तत्रत्रप
ते तव निरातिशयं भावितुमर्हति पठंति हि योभ्यासः कार्योत्कर्षकरः प्राचोपत्नाद्दधिकप्रयत्नानपेक्षश्चसतत्र
निरतिशयकार्योत्कर्षकरोति पुटकाभ्यासः इव सुवर्णस्पर्कसौसारतामिति। अप्रयत्नवत्वेप्यधिकप्रयत्ना
त्नानपेक्षत्वेपि युद्वेस्तत्पक्षपातित्वेनोदयान्निरातिशयोत्कर्षसिद्धिश्चेत्यर्थः चतमेतमित्यादिभाष्यस्य अध्यस्य
लोकव्यवहार इति भाष्येणपौनरुक्त्यमाशंक्याह यदुक्तमिति। प्रमाकरणानि प्रमाणानि नयविद्यावंतप्रेरकत्वे

नाश्रयत्वं तु प्रयोगादित्याक्षेपाभिप्रायमाह तत्त्वपरिच्छेदो हीति। विरोधाभिप्रायमाह तावविद्यावंतमिति। अ
हमहंप्रयोगादित्याक्षेपाभिमानहीनस्येति भाष्यपदं व्याचष्टे तादात्म्येति। तादात्म्याध्यासो देहादिष्वर्थैक्या
ध्यासः प्रमात्राभिमानहीनस्येत्येतद्व्याकरोति। न ह्यर्भेति। अध्यासहीनस्य प्रमातृत्वानुपपत्तिमुपपादयानिदेमा
तृत्वं हीति निर्व्यापारे चिदात्मनि प्रमाणप्रेरणव्यापारः परोपाधिरध्यस्त इति प्रमाणानामविद्यावद्विषयत्वमि
त्यर्थः। इंद्रियेति। पश्यादं द्युदं इत्यसमुदायलक्षणाद्वारेण संमूहिपरो इंद्रियशब्दः एवमिंद्रियं इंद्रियपदशब्दोपरि इं
९५ यानीं इंद्रि प्रमाणपर इति। व्यवहार इति क्रियामात्रोपादानात् समानकर्तृकक्रियाद्वयापेक्षो ऽयं क्त्वाप्रत्ययप्रयोगमा ९५
शंक्याचार्यपक्षे क्त्वाद्युरूपादि। नेन परिहरति व्यवहारक्रिययेति व्यवहार्याक्षेपादिति व्यवहारिण आक्षेपादित्यर्थः।
अनुपादायव्यवहारेण संभवतीत्यनुपपन्नमनुपादानस्य प्रमातृकर्तृकत्वेनासंभवनस्यवव्यवहारकर्तृकत्वेन
कर्तृत्वाश्रयेत्यादित्याशंक्याहानुपादायेति नैवमिह संबंधोनुपादायनसंभवतीति किंतत्त्वेनुपादायप्रयोव्यवहारः
समानसंभवतीति किमितिपुनरिति सौख्यस्य शंका। अथ स्वयमेवेतिस्यभाववादिनः। अथ इदं हृष्वेतिल्लोका
यतिकस्यैव प्रमाणप्रेरकत्वे नाध्यासं समर्थ्यं प्रमाश्रयत्वे नापि समर्थयेत् तथेति। अवश्यं चैतदर्थः। मामूत्प्र तेआ
मातृत्वमंतरेण प्रमाणप्रवृत्तिरेतावता कथं प्रमाणानामध्यासमाश्रितत्वमित्याशंक्याह चिदिति चिद्रूपसंवलित

प्रमाता आश्रयः प्रमातारीति स्वच्छता वो भवितुमर्हति। न चवित्संवलनमध्यासमंतरेणेति भवति प्रमाणान्यध्या
साश्रयाणीत्याह प्रमायां स्वच्छेति। परिणामविशेषलक्षणसत्वप्रमेयप्रवण इति सुखादेर्व्यावृत्ति परि
णामनमात्रजाड्यमुक्तो यदि चिदात्मा तत्रांतःकरणे ऽध्यस्येत तत्त्वेव तत्परिणामाश्रित चिद्रूपैकावेदिर्थः। त
त्सिद्धे वेति प्रमाश्रयत्वं हि प्रमातृत्वमित्यर्थः। अनेन तावविद्यावंतमितिग्रंथस्थ आक्षेपः परिहृतः। तत्त्वपरिच्छे
दो हीतिग्रंथस्थं परिहरति नामेवचेति। प्रमातृत्वेनचेति अनुपलक्षणे हि प्रमातृत्वे शक्तिः स्वयमेव कल्पना ध्या
सोपपादिका प्रमातुर्विदविद्रूपगर्भिणी कल्पयत्यध्यासमिति। तथाच पारमार्थमिति शेषलक्षणेभिहितं
शास्त्रफलप्रयोक्तृलक्षणत्वात्तस्मात् तस्यैव प्रयोगस्यापि तु। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र संशयः किं
सांगप्रधाने यजमानएव कर्ता उतो देशसांगात्मकप्रधानएव यजमानस्य कर्तृत्वमंगेषु यथायथमृत्विज
मिति। तत्रेदं पूर्वपक्षसूत्रं। सांगप्रधानस्य प्रयोगेनुष्ठानेस्वयं यजमानः कर्तास्यात् यतः शास्त्रगम्यफलप्रयो
क्तरि प्रतीयते। कुतस्तल्लक्षणत्वाच्छ्रुतप्रमाणकत्वाद् दृश्यार्थस्य स्वर्गकामो यजेतेति स्वर्गोद्देशेन भावनां विद
धच्छास्त्रमर्थात्कालेनाक्षिप्तसकर्तृसंबंधं फलमवगमयति। आत्मनेपदेन च फलस्य कर्तृगामिता प्रतीयते तत्सांगंव
प्रधानफलसाधनमितिसर्वत्र यजमानत्वे प्राप्ते सिद्धांतः अन्यो वास्यात् परिक्रयाम्नानादिति विप्रतिषेधात् प्रत्यगात्मनि। यदि
यजमान एव सर्वत्र कर्ता स्यात् तर्हि दक्षिणाभिः परिक्रयणमृत्विजां अनर्थकं स्यात्। अस्मिंश्च परिक्रये विप्रतिषिद्धस्तत्तः

आथर्वणादिकर्मण्विधिनिरेव कार्यं तस्मिंश्च परिकरद्वारा प्रयोजककर्तृत्वाद्यजमानस्यैव सांगफलभाक्त्वमिति। अत्र च
पूर्वपक्षसिद्धान्तयोः कर्तृगामित्वेन फले न विमानमिति पूर्वपक्षसूत्रमसिताव त्यन्तोप्रमाणमित्यक्षराद्वृत्तं। अशनायाद्यती
तत्वेसूचिताकर्तृत्ववैपरीत्यमाह प्रयोक्ता हीति। असंसारित्वमतत्त्वपदस्य चिताभोक्तृत्ववैपरीत्यमाह कर्मजानेनेति
अपेतब्रह्मत्वादुक्ताधिकारस्वरूपवैपरीत्यमाहाधिकारीति। अधिकारित्वस्य व्याख्यानं स्वामीति। अकर्त्ताकर्तृत्वत्रावित्युक्तेर्हे
तः। ननु ब्रह्मज्ञानेन कर्मविध्युपमर्दं इमदाकदापि बाधितव्यं तेन तयोः प्रमाणयोः स्मुक्त्वा हनव परस्परेति। पानकेति। पान
कं ब्रह्मवधादि उपपातकं गोवधादि संकरीकरणादीनि त्रयमनुनोक्तानि खराश्वोष्ट्रमृगेभाणामजाविकवधस्तथा
संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च॥ निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं। अपात्रीकरणं ज्ञेयमसत्य ॥१६॥
॥१६॥ स्य च भाषणं। कृमिकीटवयोहत्या मद्यानुगतभोजनं। फलैधःकुसुमस्तेयमधैर्यं च मलावहं॥ इति।
आदिशब्दात्तदुक्तं जातिभ्रंशकरादि गृह्यते। ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुंसि च मैथु
नं जातिभ्रंशकरं हि तदिति। अभ्यर्हितत्वात्तदर्थमध्यासः प्रथमं वक्तव्यः। सांशं ग्राहकत्वाहमिति। गृहित्ववि
वेकत्वात्पुत्रादीनामात्मानि तद्धर्माध्यासासंभवमाशंक्याह देहतादात्म्यमिति। देहगतस्वामित्वस्यारोपकयं
साकल्यवैकल्यारोपोक्तिस्तत्राहस्वस्य स्वत्वविकल्पेनेति। देहगतस्वामित्वस्य ये सकलत्वविकलत्वे ते वेदात्मन्य
ध्यस्ते कथं वा त्यागग्रहणं स्यात्तदाहवात्येति। साक्षिशब्दार्थमाह। चैतन्योदासीनत्वात्साक्षिशब्दार्थो यथे

रात्मन्यारोपादात्मनि कर्तृत्वभोक्तृत्वे उपपादिते इत्यर्थः। चैतन्यमिसंतः करणादिगतमित्यर्थः साक्षिणीति निर्देशा
त्। हेह्यासम्भवमपनयति मदेनेऽनेति प्रकृतमिति उपोद्घातरूपेणाध्यासं वर्णयतो भाष्यकारस्य प्रकृतं बुद्धिस्थं विले
नप्रकृतं विषयप्रयोजनमित्यर्थः एवमध्यासे समर्थिते सति प्रसिद्धत्वादजिज्ञास्यत्वमाक्षेपावसरोक्तं निरस्यितुमाह तदु
क्तमिति प रन्निति भाष्यगतारभ्यंत इति पदस्य व्याख्या अतत्पर वेदान्तजप्रत्ययो यद्यप्युपप्रा... तथाप्यध्यस्तो वा
स्तव कर्तृत्वादिनिवर्तक इत्याशंक्याह न चासाविति। अधिकरणमारचयति एतावन्निष्प्रत्यूहं शास्त्रमनारभ्यमा
रभ्यं चेति विषयप्रयोजनासंभवसंभवाभ्यां संशयः। वेदान्तैरध्ययनविधिना सामान्यतः प्रयोजनवदर्थावबोधपर
तानीति विशेषतश्च संदिह्यमानार्थत्वान्नवाविचाराकांक्षैरारोपादस्याधिकरणस्य श्रुतिसंगतिः समन्वयाद्युपेतानि
चारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसंगतयः आशंकापनयपूर्वकं पक्षमाह यद्यपीत्यादिना अविवादि
तार्थत्वं वेदान्तानां शंकितुमशक्यः अध्ययनविधेरिष्टार्थत्वस्य तुल्यत्वात् न च कार्यपरत्वात्सर्ववेदस्यासिद्धरूपे ब्रह्म
णि वेदान्तानामप्रामाण्यशंका लोकवेदयोर्वाक्यार्थस्याविशेषेण सिद्धरूपे विग्रहणि वेदान्तानां मन्त्राणामिव देवतादौ प्रामा
ण्यसंभवात् न त्वनुत्पत्तिविरूपेणाप्रामाण्यशंकैकं ब्रह्मात्मैक्यबोधित्वाद्वेदान्तानामतो नारभ्यं शास्त्रमित्यर्थः
परिहरति तथापीति प्रमाणस्वरूपपर्यालोचनेन न मीमांसानारंभमुक्ताक्षेपमयमस्य रूपाक्षेपं न पापितमाह न चेदि
वक्ष्यमाणेनेति तत्सुन ब्रह्मसाक्षात्विरित्यर्थः। वृत्तिमत्कार्यरूपज्ञानमात्मनि प्रेप्स्याह तत्र साक्षादिति प्रमाणत्वेन ज्ञान

ब्रह्म

स्यप्रयोजनसूचनमुपपाद्य संशयसूचनमुपपादयति जिज्ञासात्विति स्म हीति सान्या या॰ मिकामीमांसा अनेन ग्रंथेन
शिष्यत इत्यर्थः। विषयप्रयोजनब्रह्मस्वरूपप्रमाणयुक्तिसाधनफलविचारणांच प्रतिज्ञानानन्तरं वक्तव्यं न ततो लघु
न्यसंदिग्धार्थनिःसंशयाणां युक्तिसाधनफलविचारणांच प्रतिज्ञानान्तरं वक्तव्यत्वं कठिनानार्थस्फोरकत्वेनी
गुरु। सूचितार्थत्वे हि मुख्या न्यस्याप्यवश्यंभावित्वाद्गुर्वर्थतासिद्धिः। वक्तृ नामप्रस्तुतत्वात्तत्रैतन्निर्धारणायोगात्
कथं हतेत्विति। अथैव ज्योतिरित्यत्रापूर्वसंज्ञायोगिविध्यस्यमानकर्मप्रारंभार्थोऽथशब्दः। अधिकरणानुगुणोपसंहार
नुक्रमनिष्पत्तेप्रधानस्य जिज्ञासायाः शास्त्रेण प्रतिपाद्यमानत्वात्तत्प्रतिपादनप्रारंभार्थो माभूदिति तन्नाथ
रम्भार्थोऽपि वाक्यस्मार्थः कथं हतेति दंडी प्रैषानित्यत्र हि मैत्रावरुण प्रेष्यति चाह्वाहेति मैत्रावरुणस्य प्रैषानुवचने
॥१७॥ नेप्रास्तत्वाद्विवक्षा इह तु जिज्ञासाया नाविवक्षाकारणं। प्रस्तुतत्वविवक्षा या विषयप्रयोजनसूचनेन स्यादिति ॥१७॥
त्यर्थः। ननु किं संशयसूचनेन निर्दिष्टे ब्रह्मतत्त्वज्ञानएव विषयप्रयोजने सिध्यतस्तत्राह नहीति। अपरस्तु समा
नत्वात्प्रसार्थिकरणमप्रतिपाद्यमानत्वात्। मान्वयेत्याह रुग। त्यो दीर्घश्चाभ्यासस्येति सन्नेणमा ज्ञानेदत्तस्य
उन्मुक्त धस्य धा नो नान्तत्वं निपातितं। अस्य च पूजितविचारार्थत्वं प्रसिद्धिवशात्त्वतो नान्तस्य तु मत्वर्थत्वं स्मृतिसिद्धमिति।
मानिसारिधातुभ्यः सन् ... वद्भ्यासस्य च दीर्घ इत्यर्थः। धातोः कर्मण इत्यत्र सूत्रे इच्छार्थे सन्विधानादप्रमानि
ज्ञार्थ इति गम्यते इत्यन्तिवेति विचारप्रारंभार्थोऽयं शब्दोक्तेनेत्याहन तथा पर्यवस्यतीति। वाच्यमाजिज्ञासापदः संज्ञा जि
परसूत्रेनेन वाक्यार्थत्वोपक्षेपोन लक्षणा। अथेमं तविषयप्रयोजनस्य तत्र विचारेप्रवक्ते स्येतीत्यर्थः। अ

भाधिकारार्थेस्मिन्नत्राथशब्दस्यानन्तर्यार्थत्वं वक्तव्यं। किं पूर्वप्रकृतादथशब्दाद्यानन्तर्यमुतनिरंतरशा
ज्ञानन्तर्यप्रज्ञानाद्यरत्याह पूर्वप्रकृतस्येति द्वितीये पूर्वप्रकृतमथशब्दमपेक्ष्य किं निरंतरशब्दानन्तर्यं पलप
ज्ञाद्यानन्तर्यं प्रमात् द्वितीयोऽथशब्दोऽधिकारार्थत्वपक्षस्युता नपेक्ष्यैवनाद्यावरयापेक्षणीयत्वात् पूर्वप्रकृता
पेक्षा पाक्षपरशब्दस्यतादर्थ्येसत्यर्थांतरकल्पनानवकाशात्तद्द्वितीयपरत्वाहनसप्रकृतानपेक्षेति। एकस्यार्थ
पेक्षणे हितन्निरूपकयोः पक्षयोरुक्त्यार्थत्वेन विकल्पः कल्पतरत्यर्थः नानेनभाष्येण पूर्वप्रकृतापेक्षा या आनं
न्तर्यरूपत्वमुच्यते आनंतर्यपक्षविकल्पाप्रतिभानात्। किं तु भयत्रापि ब्रह्मजिज्ञासाहेतुभूते पूर्वप्रकृतसिद्धिरस्ति
प्रयोजनमनुः फलद्वारेणाव्यतिरेकतस्यतरत्याह स्यार्थ इति नेतु उभयत्राफलाकांक्षे कि मित्यानंतर्यमाह स्तत्रा
तुपरमार्थतस्त्विति। अन्यदप्यहरहरादिकमपेक्ष्य भवतीजिज्ञासायास्मिन्सतिभवत्येवेत्यर्थः। व्याख्यायाध्ययना
नंतरब्रह्मजिज्ञासायाः कुतोऽवितु योग्यत्वात्तदानन्तर्यमथशब्देनवक्तुमुक्तमित्यर्थयोत्वे कारणमाह ब्रह्मणोपी
तिस्वाध्यायस्यनित्यत्वात्तदानन्तर्यमयुक्तमिति न हि विषयमध्ययनं लक्षयतीत्यर्थः। ननु धर्मजिज्ञासासूत्रेब्रह्मा
नुपादानात् कथं तेनाग तार्थता तत्राह धर्मशब्दस्येति। नान्विछायां विनियोगो न ज्ञान इति तत्राह ज्ञानस्यैवेति। अर्थतः
प्राधान्यात् ज्ञानस्य तत्रैव विनियोग इत्यर्थः। साक्षात्कारोपयोगि श्रवणादीनामाह तत्रापीत्यादिना विशेषहेत्व
भावोसिद्ध इत्याह तत्त्वमसीति। योग्यतावधारणे कर्म किम प्रमाण्यते योग्य तदुत्तमप्रमाणतया नायोऽप्रमा

॥१९८॥

णात्प्रमाणकार्यो स्यादृक्षाचारादित्याह तत्किमिति प्रमाणानां कारणं यस्य तत्तथानाद्वितीयः कर्मणः प्रमाणत्व
प्रसिद्धभावादित्याह प्रत्यक्षादीति पातञ्जलसूत्रे स्मरति चित्तवृत्तिनिरोधयुक्तः दृढभूमिः तत्त्वप्रतिपत्तौ
हेतुरुपायः स्यार्थं निर्मलताभावसंस्कारद्वारा भावनागत्वमुक्तास्ते च कर्मणामुत्पत्तिविधिविहितत्वेन प्रमुपा
दाय भावनांगतां विनियोजकवचनवशेनाहनापेक्षितेति। संयोगः शेषत्वबोधनं चतुर्थे विनिर्णीतं। एकस्यापि
निरवादिरे पशुकामाति। खादिरे वीर्यकामस्य यूपं कुर्वीतेति वाक्ये श्रूयते तत्र संशयः किं काम्येव खादिरता नित्येपि
स्यादुतैनेति तत्र फलार्थत्वेनानित्यायामपि तत्प्रयोगांगता नानमुक्तायतु नित्येपि। खादिरत्वश्रवणं तत्काम्य
स्यैव पशुबन्धयूपक्रतूपाश्रयदानार्थं ततो नानित्ये खादिरतेति प्राप्ते राद्धान्तः एकस्य खादिरत्वस्य क्रत्वर्थपुरुषा ॥१९८
र्थत्वरूपोभयात्मकत्वे वचनद्वयेन क्रतुशेषफलशेषत्वलक्षणसंयोगभेदावगमान्नित्यानित्यसंयोगविरोधः
नवाश्रयदानामनित्यवाक्यसन्निधानाद्वैवाश्रयलाभात्। अनन्यथार्थखादिरतेति। विनियोगणत्रयमवतीति आ
दृष्टमेरतयैदीर्घकालवतीत्यर्थः कर्मापेक्षत्वेनाब्रह्मभावनायास्तद्वबोधापेक्षामुपपादयेन कर्मावबोधा
नंतर्यसिद्धिभाष्यं घटयतीति नवेति। दृष्ट उपकारस्कन्धविमोकादिरदृष्टः प्रोक्षणादिजः प्रयाजादिजन्यस्तेवासौ यथा
योगं साम यापिकः क्रतुस्वरूपसमवायी कः क्रतुस्वरूपसमवायी आराद् दूरे फलापूर्वसिद्ध्युपकारस्य
संस्तौ तस्य हेतुभूतानि दृष्टादृष्टेपशिकानि प्रत्यक्षश्रुतिविहितानि। आतिदेशिकानि प्रकृते विकृतावति

दैवप्राप्ताणि क्रमपर्यन्तानि क्रमेणाप्रवृत्तिभान्यंगानि तेषां ग्राम समूहः। तत्सहितं परस्परविभिन्नं कर्मस्व
रूपं तदपेक्षिताधिकारिविशेषश्च तयोः परिज्ञानं विना कर्म्मणि न शाब्दानुष्ठानस्य सम्भवः। औपदेशि
कातिदेशिकेति शेषलक्षणाद्वारभ्योपरितनतंत्रस्याध्याय कर्मपर्यन्तेति पंचमः। यस्य अंगग्रामेतितानी
मस्य सहिते विचारो नु। र्थिकस्य प्रयोज्यप्रयोजकविचारस्य परस्परविभिन्नेति द्वितीयलक्षणाध्यायस्य तद्विषयका
रीतिलक्षणाध्यायाप्रार्थस्य दृष्टादृष्टेति संस्कारकर्मत्वगुणकर्मत्वप्रधानकर्मत्वादिविचारप्रश्न द्वितीयाध्याय
गतानामपेक्षेत्यन्तं द्विरवशेषेति। आग्नेययागः स्वाध्यायमेदृश्यते दानं हुतो नीति विवचनात् द्विहर्द विशेषवपती
तिविहितं द्विरवत्तपुरोडाशमपेक्षत इति भावना साध्ये साक्षात्कारे यदि कर्मापेक्षा तर्हि स्वत्रसस्वरूपम
न्यो वा स्वरूपत्वेन कर्मापेक्षत्वात् सत्त्वेतीति नापि ह्यसंयोगी नीति विहितमिश्रणस्यापि उत्पाद्यः गांदेश्री
विहितप्रोहेत प्राप्यपयः साक्षात्कारस्य ब्रह्मस्वरूपात् भेदे ब्रह्म जडत्वस्यात् दृष्टिपाद्य गोचरः ब्रह्मपरोक्ष
प्रमाहेतुरिति केवलभावनाभूः साक्षात्कारोऽप्रमास्यादि स्याह तन्नोभिन्नस्य चेतनिमंथरं स्थितमितं स्फुरद्रूप
त्वाज्जडाकारा अस्य संतीति जटिलः न च कूटस्थेति कूटस्थनित्यस्य तथापूर्वरूपापायलक्षणो विकारो ज्ञानी
न्न वगुणो स्वरूपः संस्कारस्य नरत्वः सर्वव्यापितया न प्रसक्तिः कूटस्थ नित्यत्वात्तु हं दोषनिर्यात
संस्कारमात्रा। निर्वचनीयेति। प्रतीत्सीशानेर स्फुरिणी। रग आपृनो वेन रः। आरोहोद्धायः विस्तारपरि

कृष्ण

माणपरिणाहः। उपास्तिलाकिमापादु ज्ञानाभ्यासो निश्चयाभ्यासो वा आद्ये द्वितीयं शंकनेनाखि
लो। ननूपासनेनैवाविद्यानिवर्त्त्यतु। किं साक्षात्कारेण यत्र कर्मोपयोगस्तत्राहतु न वेति। ननु रज्जुसर्पादि
भ्रमाऽपरोक्षाऽप्याप्तवचनादिजनितपरोक्षज्ञानेन निवर्त्तते सत्वं तेन निरुपाधिका कर्तृत्वादि सोपाधि
कस्माक्लिप्ते सतेत्याविधमुदाहरति। दिङ्मोहेति। नैरंतर्येण ततरूपत्वच्छेदस्थ भ्रमः अपरोक्षेव प्रमाणे
नाद्वैरवापरोक्षज्ञानहेतुरन्यथा तत्र परोक्षज्ञानस्य भ्रममत्वापातादिति तत्राह नवेषरति। अयमपि सांधि
स्यतोऽपरोक्षस्यापि प्रमाणपरोक्ष्यं भ्रमगृहीतं तत्रापरोक्षप्रमाकरणादेव तत्साक्षात्कारः। अतः करणं
॥१९॥ वसोपाधिक आत्मनि ज्ञानपत्यपरोक्षाहं दृनिमिति सिद्धमस्यात्मन्य परोक्षधीहेतुत्वं। ननु शाब्दजनितब्रह्मा १९
त्मैकधीसंततिवासितेन तत्पदलक्ष्यैक्यब्रह्मात्मतां जीवस्य साक्षात्कारयति। अतएव पूर्वानुभवसंस्का
रवासितं तेन्नेदं तेप्रत्यभिज्ञते कविषयप्रसक्तिर्नाहेतुः शाब्दस्य नापरोक्षप्रमाहेतुः कुतः प्रमेयापरोक्ष्यो
प्यत्वे न प्रमायाः साक्षात्कारत्वे देहात्मकेद विषयानुमितेऽपि तदापत्तिः। दशमस्त्वमसीत्यत्रापि तत्सविवादस्था
देव साक्षात्कारः। अथादेरपरोक्षधीरेव अपि च वेदांतवाक्यैकातत्त्वज्ञानभावनाजापरोक्षधीः। स्वच्छप मा
प्तुद्वीन नभ्रमं तत्त्वं प्रपेद्यते। न च प्रामाण्यरतस्त्वापातः। अपवादनिशासायमूलश्वध्यनुरोधनोत्

द्वयन्ते त्वस्य यावुद्धोऽसाद्रेनैयत्वं हि तत्व वैचनादित्यमुररीकारः साक्षादपरोक्षादित्येव माकारैर्वधीः
स्याद्वाद्वैतेन तु परोक्षं ब्रह्मेति। शातु करणस्याभ्यासशेक्षावतिष्ठते न तु भ्रमइति सर्वभवद्रातं।
स्वनूपप्रकाशस्यापि व्यक्तिसंस्कारमुपपाद्य संजकांतःकरणद्वैतेनुत्साहितामं हं कर्मोपयोगायनवेति। वृ
त्तिविषयत्वे ब्रह्मणोऽस्वप्रकाशत्वमाशंक्यासमुच्चयमतेऽपि साम्यमाह नचैवतानवेति। स्वप्रकाशस्यैव शा
ब्दज्ञानविषयत्वं त्वयापीष्टमित्यर्थः। परिहारसाम्यमाह सद्वैति ननु निरुपाधिब्रह्मसाक्षात्कारगोचरः क
थमुपहिततेति तत्राह नचांतःकरणेति। निरुपाधिकं ब्रह्मेतिविधयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्ति
हेतुनुदयते स्वस्याऽप्युपाधित्वाविशेषात्। ततः स्वसत्तायां विनाशहेतुसान्निध्याद्विनश्यद्वस्थत्वाद्ध
चनानुपाहितस्यविषयता न वोपाधेनिवर्त्तकांतरापेक्षेति भावः। ननु वृत्तिविशिष्टस्य शबलत्वमानतत्वसा
क्षात्कारगोचरता वृत्त्यवच्छिन्नात्मविषमत्वे न वृत्तेः स्वविषयत्वापातः विशेषणाग्रहे विशिष्टाग्रहात् उप
लक्षितस्य तु न वृत्त्युपाधिकतेति। उच्यते। वृत्तरूपरागोत्रसतयोपपुल्यतेन प्रतिभासस्य तमाऽतो वृत्तिसं
सर्गेऽसत्यात्माविषयोऽपवति। न तु स्वतइति न दोषः। ननूपाधिसंबंधाद्विषयत्वं विषयत्वेवोपाधिसंबंधो
विषयविषयित्वलक्षणइतीतरेतराश्रयमत आह नेत्येति। न ब्रह्मसाक्षात्कारस्य ब्रह्मविषयत्वप्र
युक्तं चैतन्यप्रतिबिंबितत्वं किं तु स्वतः घटादिवृत्तिष्वपि साऽभ्यात्। चैतन्यं न ब्रह्मेति स्याभाविका

कल्प

वृत्तेस्तत्संबंधस्त्यर्थः। तच्च ब्रह्मस्वरूपव्यतिरिक्तसाक्षात्कारस्य भ्रमत्वमिति तत्राह नचेति विषयविसं
